संस्कृत-व्यवहार-साहस्री

SAMSKRITA-VYAVAHARA-SAHASREE

प्रकाशनम्

हिन्दु सेवा प्रतिष्ठानम्

संस्कृत विभागः

PREFACE

There are quite a few who know a bit of Samskrita and would very much desire to speak and converse in that great language. But they lack expression. Right words and right construction of sentences fail and often they have to indulge in some verbal acrobatics. The answer to this predicament can only be to have on hand sets of suitable ready made sentences. That would at one stroke give confidence and knowledge to match one's expressions with one's ideas and emotions.

The present "Samskrita vyavahara sahasri" is the fruit of several successful experiments carried out in "Speak Samskrita camps" conducted in several parts of the country.

When a similar collection of a few hundred simple sentences for use of school-going children was brought out, demand mounted for an expanded version of the same for the use of persons of all age-groups. Many scholars came forward to fulfil this need, to whom we offer our heartfelt gratitude.

We are happy to record our deep-felt gratitude to Shri Vijayam Krishna Murthy, of Bharani Agencies, who has liberally donated for this publication.

The original publication was in Kannada and the present English version has been prepared by Prof. G. S. Mudambadithaya, Professor, Regional Institute of English, Bangalore, who took up this work as a labour of love and dedication to the cause of Samskrita. Our deep indebtedness to him.

We are thankful to M/s. Prabha Printing House for their neat printing and get up of this book.

The sentences presented here have been selected on the criterion of their utility and applicability in day-to-day life. Obviously, the present selection of sentences needs continuous improvement in the light of further experiments and experience. We earnestly solicit suggestions from our enlightened students of Samskrita learning in this regard.

PUBLISHERS

विषयाः Contents

Note.—In the place of "युष्मद् शब्दः" (त्वम्), here "भवत्-शब्दः" (भवान्/भवती) is used for the convenience of Samskrita conversation learning.

संस्कृत-व्यवहार-साहस्री

SAMSKRITA-VYAVAHARA-SAHASREE

शिष्टाचारः Common formulas

हरिः ओम् ।	Hullo.
सुप्रभातम्/नमस्ते/नमस्कारः ।	Good morning/good afternoon/good evening.
शुभरात्रिः ।	Good night.
धन्यवादः ।	Thank you.
स्वागतम् ।	Welcome.
क्षम्यताम् ।	Excuse/pardon me.
चिन्ता मास्तु ।	Don't worry.
कृपया ।	Please.
पुनः मिलामः ।	Let us meet again.
अस्तु ।	All right/O.K.
श्रीमन् ।	Sir.
मान्ये/आर्ये ।	Madam.
साधु साधु/समीचीनम् ।	Very good.

मिलनम् Meeting

भवतः नाम किम् ?	What is your name ? (masc)
भवत्याः नाम किम् ?	What is your name ? (fem.)
मम नाम '———'	My name is '———'.

एषः मम मित्रं '——' This is my friend '——'

एतेषां विषये श्रुतवान्। I've heard of him.

एषा मम सखी '——' This is my friend '——'

भवान् किम् (उद्योगं) करोति?
भवती किम् (उद्योगं) करोति? What do you do?

अहं अध्यापकः अस्मि। (पु.)
अहं अध्यापिका अस्मि। (स्त्री). I am a teacher (fem. masc.)

अधिकारी	Officer	उट्टङ्कक:	Typist
तन्त्रज्ञः	Engineer	प्राध्यापकः	Professor
लिपिकः	Clerk	न्यायवादी	Lawyer
विक्रयिकः	Salesman	उपन्यासकः	Lecturer

अहं यन्त्रागारे कार्यं करोमि। I work in a factory.

कार्यालये	in an office	महाविद्यालये	in a college
वित्तकोषे	in a bank	चिकित्सालये	in a hospital
प्रौढशालायां	in a high school	यन्त्रागारे	in a factory

भवान्/भवती कस्यां कक्ष्यायां पठति?

Which class are you in?

अहं नवमकक्ष्यायां पठामि। I am in Std. IX

अहं I/II/III/B.Sc. कक्ष्यायां पठामि।

I am in I/II/III/B.Sc. Class.

भवतः ग्रामः? Where are you from?

मम ग्रामः I am from....

कुशलं वा ? कथमस्ति भवान् ?	How are you ?
गृहे सर्वे कुशलिनः वा ?	Are all well at home ?
सर्वं कुशलम् ।	All is well.
कः विशेषः ? /का वार्ता ?	What news ?
भवता एव वक्तव्यम् ।	You have to say.
कोऽपि विशेषः ?	Anything special ?
भवान् / भवती कुतः आगच्छति ?	Where are you coming from ?
अहं शालातः गृहतः तः } आगच्छामि	I am coming from ....
भवान् / भवती कुत्र गच्छति ?	Where are you going ?
भवति वा इति पश्यामः ।	Let us see if it can be done.
ज्ञातं वा ?	Understand ?
कथम् आसीत् ?	How was it ?
अङ्गीकृतं किल ?	Agreed ?
कति अपेक्षितानि ?	How many do you want ?
अद्य एव वा ?	Is it today ?
इदानीं एव वा ?	Is it going to be now ?
आगन्तव्यं भोः ।	Please do come.
तदर्थं वा ?	Is it for that ?
तत् किमपि मास्तु ।	Don't want that.
न दृश्यते ?	Can't you see ?

*

समाप्तं वा ?	Is it over ?
कस्मिन् समये ?	At what time ?
तथापि ... ... ।	Even then ......
आवश्यकं न आसीत् ।	It was not necessary.
तिष्ठतु भोः ।	Be here for some more time.
स्मरति किल ?	Remember, don't you ?
तथा किमपि नास्ति ।	No, it is not so.
कथम् अस्ति भवान् ?	How are you ?
न विस्मरतु ।	Don't forget.
अन्यच्च	Besides... ....
तदनन्तरम्.......	Then........
तावदेव किल ?	Is it only so much ?
महान् सन्तोषः ।	Very happy about it.
तत् तथा न ।	It is not so.
तस्य कः अर्थः ?	What does it mean ?
आम् भोः	Yes, dear/sir........
एवमेव	Just.......
अहं { देवालयं / कार्यालयं / विपणिं } गच्छामि ।	I am going to——
किं चिराद् दर्शनम् ?	What is the matter ? You are not seen these days.
भवन्तं कुत्रापि दृष्टवान् ।	I remember to have seen you some where.

भवान् सम्भाषणशिबिरं आगतवान् वा ?
Have you come to the conversation camp ?

तर्हि कुत्र दृष्टवान् ? In that case where have I seen you ?

तर्हि तत्रैव दृष्टवान्।
I must have seen you there in that case.

सरल-वाक्यानि Simple sentences

तथैव अस्तु।	Let it be so/so be it.
जानामि भोः।	I know it.
आम्, तत् सत्यम्।	Yes, that's right.
समीचीना सूचना।	A good suggestion indeed.
किञ्चित् एव।	A little.
किमर्थं तद् न भवति ?	Why can't that be/done ?
भवतु नाम।	Leave it at that.
ओहो ! तथा वा ?	Oh ! Is that so ?
एवमपि अस्ति वा ?	Is it like this ?
अथ किम् ?	Then ?
नैव किल ?	No.
भवतु।	Yes.
आगच्छन्तु।	Come in.
उपविशन्तु।	Please sit down.
सर्वथा मास्तु।	Definitely no.
अस्तु वा ?	Can that be so ?

किमर्थं भोः ? Why ?

प्राप्तं किल ? You have got it, haven't you ?

सामान्य-वाक्यानि Ordinary sentences

प्रयत्नं करोमि। I'll try.

न शक्यते भोः। No I can't.

तथा न वदतु। Don't say that.

तत्र कोऽपि सन्देहः नास्ति। There is no doubt about it.

तद् अहं न ज्ञातवान्। I didn't know that.

कदा ददाति ? When are you going to give ?

अहं कथं वदामि 'कदा इति' ? How can I say when ?

तथा भवति वा ? Can that be so ?

भवतः समयावकाशः अस्ति वा ? Are you free ?

अद्य भवतः कार्यक्रमः कः ?
What are your programmes for today ?

अरे ! पादस्य/हस्तस्य किं अभवत् ?
Oh ! What happened to your legs/arms ?

बहुदिनेभ्यः ते परिचिताः। I have known him for long.

तस्य कियद् धैर्यं/धार्ष्ट्यम् ? How dare he is ?

भवान् न उक्तवान् एव। You haven't told me.

अहं किं करोमि ? What can I do ?

अहं न जानामि। I don't know.

यथा भवान् इच्छति तथा। As you wish/say.

भवतु, चिन्तां न करोतु । Yes, don't bother.

तेन किमपि न सिध्यति ।
There is no use/nothing happens on account of that.

सः सर्वथा अप्रयोजकः । He is good for nothing.

पुनरपि एकवारं प्रयत्नं कुर्मः । Let us try once more.

मौनमेव उचितम् । Better be quiet.

तत्र अहं किमपि न वदामि ।
I do not want to say anything in this regard.
No comments, please.
I must think before I say anything.

तर्हि समीचीनम् । O.K. if that is so.

एवं चेत् कथम् ? How to get on if it is so ?

मां किञ्चित् स्मारयतु । Please remind me.

तं अहं सम्यक् जानामि । I know him well.

तदानीमेव उक्तवान् किल ? Haven't I told you already ?

कदा उक्तवान् भोः ? When did you say so ?

यत्किमपि भवतु । Happen what may.

सः बहु समीचीनः । He is a good fellow.

सः बहु रूक्षः । He is very rough.

तद्विषये चिन्ता मास्तु । Don't worry about that.

तथैव इति न नियमः । It is not like that.

कर्तुं शक्यम्, किंचित् समयः अपेक्ष्यते ।
I/We can do it, but require time.

एतावत् अपि कृतवान् ! At least he has done this much !

द्रष्टुं एव न शक्यते । — Can't see it.

तत्रैव कुत्रापि स्यात् । — It may be somewhere there.

यथार्थं वदामि । — I am telling the truth.

एवं भवितुं अर्हति । — This is O.K./alright.

कदाचित् एवमपि स्यात् । — It may be like this sometimes.

अहं तावदपि न जानामि वा ? — Don't I know that much ?

तत्र गत्वा किं करोति ? — What are you going to do there ?

पुनः आगच्छन्तु । — Come again.

मम किमपि क्लेशः नास्ति । — It is no trouble (to me).

एतद् कष्टं न । — This is not difficult.

भोः, आनीतवान् वा ? — Have you brought it ?

भवतः कृते कः उक्तवान् ? — Who told you this ?

किञ्चिदनन्तरं आगच्छेत् । — He/It may come sometime later.

प्रायः तथा न स्यात् । — By and large, it may not be so.

चिन्ता मास्तु, श्वः ददातु । — It is no bother, return it tomorrow.

अहं पुनः सूचयामि । — I will let you know.

अद्य आसीत् वा ? — Was it today ?

अवश्यं आगच्छामि । — Certainly, I will come.

नागराजः अस्ति वा ? — Is Nagaraj in ?

किमर्थं तत् एवं अभवत् ? — Why did it happen so ?

तत्र आसीत् वा ? — Was it there ?

किमपि उक्तवान् वा ? Did you say anything ?

कुतः आनीतवान् ? Where did you bring it from ?

अन्यत् कार्यं किमपि नास्ति । Don't have any other work.

मम वचनं श्रृणोतु । Please listen to me.

एतत् सत्यं किल ? It is true, isn't it ?

तद् अहं अपि जानामि । I know it myself.

तावद् आवश्यकं न । It is not needed so badly.

भवतः का हानिः ? What loss is it to you ?

किमर्थं एतावान् विलम्बः ? Why are you late ?

यथेष्टम् अस्ति । Available in plenty.

भवतः अभिप्रायः कः ? What do you say about it ?
What is your opinion ?

अस्य किं कारणम् ? What is the reason for this ?

स्वयमेव करोति वा ? Do you do it yourself ?

तत् न रोचते । I don't like it.

उक्तं एव वदति सः । He has been repeating the same thing.

अन्यथा बहु कष्टम् ।
It will be a big botheration if it is not so.

किमर्थं पूर्वं न उक्तवान् ? Why didn't you say it earlier ?

स्पष्टं न जानामि । Don't know exactly.

निश्चयः नास्ति । Not sure.

कुत्र आसीत् भवान् ? Where were you ?

भीतिः मास्तु । Don't get frightened.

भयस्य कारणं नास्ति Not to fear.

द्रष्टुं एव न शक्यते ।	Can't see it.
तत्रैव कुत्रापि स्यात् ।	It may be somewhere there.
यथार्थं वदामि ।	I am telling the truth.
एवं भवितुं अर्हति ।	This is O.K./alright.
कदाचित् एवमपि स्यात् ।	It may be like this sometimes.
अहं तावदपि न जानामि वा ?	Don't I know that much ?
तत्र गत्वा किं करोति ?	What are you going to do there ?
पुनः आगच्छन्तु ।	Come again.
मम किमपि क्लेशः नास्ति ।	It is no trouble (to me).
एतद् कष्टं न ।	This is not difficult.
भोः, आनीतवान् वा ?	Have you brought it ?
भवतः कृते कः उक्तवान् ?	Who told you this ?
किञ्चिदनन्तरं आगच्छेत् ।	He/It may come sometime later.
प्रायः तथा न स्यात् ।	By and large, it may not be so.
चिन्ता मास्तु, श्वः ददातु ।	It is no bother, return it tomorrow.
अहं पुनः सूचयामि ।	I will let you know.
अद्य आसीत् वा ?	Was it today ?
अवश्यं आगच्छामि ।	Certainly, I will come.
नागराजः अस्ति वा ?	Is Nagaraj in ?
किमर्थं तत् एवं अभवत् ?	Why did it happen so ?
तत्र आसीत् वा ?	Was it there ?

किमपि उक्तवान् वा ?	Did you say anything ?
कुतः आनीतवान् ?	Where did you bring it from ?
अन्यत् कार्यं किमपि नास्ति ।	Don't have any other work.
मम वचनं शृणोतु ।	Please listen to me.
एतत् सत्यं किल ?	It is true, isn't it ?
तद् अहं अपि जानामि ।	I know it myself.
तावद् आवश्यकं न ।	It is not needed so badly.
भवतः का हानिः ?	What loss is it to you ?
किमर्थं एतावान् विलम्बः ?	Why are you late ?
यथेष्टम् अस्ति ।	Available in plenty.
भवतः अभिप्रायः कः ?	What do you say about it ? What is your opinion ?
अस्य किं कारणम् ?	What is the reason for this ?
स्वयमेव करोति वा ?	Do you do it yourself ?
तत् न रोचते।	I don't like it.
उक्तं एव वदति सः।	He has been repeating the same thing.
अन्यथा बहु कष्टम् ।	It will be a big botheration if it is not so.
किमर्थं पूर्वं न उक्तवान् ?	Why didn't you say it earlier ?
स्पष्टं न जानामि ।	Don't know exactly.
निश्चयः नास्ति ।	Not sure.
कुत्र आसीत् भवान् ?	Where were you ?
भीतिः मास्तु ।	Don't get frightened.
भयस्य कारणं नास्ति	Not to fear.

तदहं बहु इच्छामि। I like that very much.
कियत् लज्जास्पदम्! What a shame!
सः मम दोषः न। It's not my fault.
मम तु आक्षेपः नास्ति। I have no objection.
सः शीघ्रकोपी। He is short tempered.
तीव्रं मा परिगणयतु। Don't take it seriously.
आगतः एषः वराकः! Camped here!
युक्ते समये आगतवान्। You have come at the right time.
बहु जल्पति भोः। He talks too much.
एषा केवलं किंवदन्ती। It is just gossip.
किमपि न भवति। Nothing happens.
एवमेव आगतवान्। Just came to call on you.
विना कारणं किमर्थं गन्तव्यम्? Why go there unnecessarily?
भवतः वचनं सत्यम्। You are right.
मम वचनं कः श्रृणोति! Who listens to me!
तदा तत् न स्फुरितम्। It didn't flash me then.
किमर्थं तावती चिन्ता? Why so much botheration?
भवतः किम् कष्टम् अस्ति? Tell me, what your trouble is?
छे, एवं न भवितव्यं आसीत्।
Tsh, it should not have happened.
अन्यथा न चिन्तयतु। Don't mistake me.

मित्र-मिलनम् Meeting the friends

नमोनमः। Good morning/afternoon/evening.

किं भोः, दर्शनमेव नास्ति ! Hullo, didn't see you for long !

नैव, अत्रैव सञ्चरामि किल !
No, I have been moving about right here !

किं भोः, वार्ता एव नास्ति ?
Hullo, not to be seen for a long time !

किं भोः, एकं पत्रं अपि नास्ति ?
Hey, you haven't even written a letter !

वयं सर्वे विस्मृताः वा ?
You have forgotten us all, haven't you ?

कथं विस्मरणं भवति भोः ? How can I forget you ?

भवतः सङ्केतं एव न जानामि स्म ।
I didn't know your address.

महाजनः संवृत्तः भवान् । You have become a big man.

भवान् एव वा ! दूरतः न ज्ञातम् ।
Is it you ? I couldn't recognize you from a distance.

ह्यः भवन्तं स्मृतवान् । I remembered you yesterday.

किं अत्र आगमनम् ? What made you come here ?

अत्रैव किञ्चित् कार्यं अस्ति । I have some work here.

त्वरितं कार्यं आसीत् । अतः आगतवान् ।
I am here as I have some urgent work.

बहुकालतः प्रतीक्षां करोमि ।
I have been waiting for you for a long time.

यानं न प्राप्तम्, अत एव विलम्बः ।
Could not get the bus, hence late.

आगच्छतु भोः, गृहं गच्छामः । Come, let us go home.

इदानीं वा, समयः नास्ति भोः । Now? No time, you know.

श्वः सायं मिलामः वा? Shall we meet tomorrow evening?

अवश्यं तत्रैव आगच्छामि । I'll come there without fail.

इदानीं कुत्र उद्योगः? Where do you work now?

यन्त्रागारे उद्योगः । I work in a factory.

ग्रामे अध्यापकः अस्मि । I am a teacher in a village.

इदानीं कुत्र वासः? Where are you put up?

एषः मम गृहसङ्केतः । This is my address.

यानम् आगतम्, आगच्छामि । Bus has come, bye, bye.

अस्तु, पुनः पश्यामः । Ok. Let us meet again.

पुनः अस्माकं मिलनं कदा? When shall we meet again?

पुनः कदा मिलति भवान्? When are you going to meet me?

तद्दिने किमर्थं भवान् न आगतवान्?
Why didn't you come that day?

वयं आगतवन्तः एव । We have already arrived.

भवतः समीपे सम्भाषणीयं अस्ति ।
I have some thing to talk to you about.

भवान् अन्यथा गृहीतवान् । You have mistaken me.

भवन्तं बहु प्रतीक्षितवान् । I very much expected you.

बहुकालतः तस्य वार्ता एव नास्ति ।
No news from him for days.

भवतः पत्रम् इदानीम् एव लब्धम् ।
I have just received your letter.

किञ्चिद्दूरं अहमपि आगच्छामि ।
I will walk with you for some distance.

मिलित्वा गच्छामः । Let us go together.

तिष्ठतु भोः, अर्धार्धं काफी पिबामः ।
Wait, let's have a by-two coffee.

अस्तु, पिबामः । Fine, let us have it.

स्थातुं समयः नास्ति । No time to stay.

गमनात् अनुक्षणमेव पत्रं लिखतु ।
Write as soon as you reach there.

पुनः कदाचित् पश्यामि । Meet you again.

यदा कदा वा भवतु, अहं सिद्धः । I am ready any day.

तेषां कृते मम शुभाशयान् निवेदयतु ।
Convey my good wishes to him/them.

किं भोः, एवं वदति ? Hey, why do you say so ?

किञ्चित् कालं तिष्ठतु । Please wait for some time.

भवान् एव परिशीलयतु । Think about it, yourself.

अत्र पत्रालयः कुत्र अस्ति ? Where is the post office, here ?

कियद्दूरे अस्ति ? How far is it ?

वित्तकोषः कियद्दूरे अस्ति ? How far is the bank ?

किमर्थं एवं त्वरा (संभ्रमः) ? Why, so much of confusion ?

इतोऽपि समयः अस्ति किल ? There is still time, isn't it ?

सर्वस्य अपि मितिः भवेत् ।
There should be some limit for everything.

कियद् इति दातुं शक्यम् ? How much can I give him ?

कस्मिन् समये प्रतीक्षणीयम् ? When shall I expect ?

गृहे उपविश्य किं करोति ?
What are you going to do sitting at home ?

भवतः परिचयः एव न लब्धः । Could not recognize you.

किं भोः, बहु कृशः जातः ? Hey, you have become very weak.

अवश्यं मम गृहं आगन्तव्यम् । Please do call on us.

सः सर्वत्र दर्वीं चालयति । He pokes his nose everywhere.

यथा भवान् इच्छति । I am game for whatever you say.

परिहासाय उक्तवान् भोः । I said it in fun, you know.

एषः भवतः अपराधः न । It is not your fault.

नैव, चिन्ता नास्ति । No, no trouble/botheration.

वयं इदानीं अन्यद्गृहे स्मः ।
We live in a different house now.
Changed our residence.

भवान् मम अपेक्षया ज्येष्ठः वा ? Are you elder to me ?

ओहो, मम अपेक्षया कनिष्ठः वा ? Younger to me, is it ?

भवान् विवाहितः वा ? Are you married ?

नैव, इदानीमपि एकाकी । No, still a bachelor.

भवतः पिता कुत्र कार्यं करोति ?
Where does your father work ?

सः वर्षद्वयात् पूर्वमेव निवृत्तः । He retired two years ago.

सः वृद्धः इव भाति । He looks aged.

भवन्तः सर्वे सहैव वसन्ति वा ? Do all of you live together ?

नैव, सर्वे विभक्ताः । No, we live separately.

भवतः वयः कियत् ? How old are you?

भवन्तः कति सहोदराः ? How many brothers are you?

वयम् आहत्य अष्टजनाः । We are eight.

भवान् एव ज्येष्ठः वा ? Are you the eldest?

मम एकः अग्रजः अस्ति । I have an elder brother.

सः इदानीमपि बालः । He is still a boy.

भवतः अनुजायाः कति वर्षाणि ?
How old is your younger sister?

भवान् मा ददातु, मा स्वीकरोतु ।
Neither give, nor take anything.

अन्यं कमपि न पृच्छतु । Don't ask any one except.

तर्हि सर्वं दायित्वं भवतः एव ।
In that case the entire responsibility is yours.

सर्वत्र अग्रे सरति । He takes the initiative in everything.

भवन्तं गृहे एव पश्यामि । I'll see you in your house.

सः निष्ठावान् । He is very orthodox.

यावदहं प्रत्यागच्छामि, तावद् प्रतीक्षां करोतु ।
Wait till I come.

द्वयोः एकः आगच्छतु । Either of the two come.

तस्य कृते विषयः निवेदितः वा ?
Have you informed him about the news?

तस्य कृते सः अत्यन्तं प्रीतिपात्रम् ।
He is closely related to him.

भवता एतद् न कर्तव्यम्   You should not do this.

यदि सः स्यात् ...... ।   Had he been here ....

अवश्यं आगन्तव्यं, न विस्मर्तव्यम् ।
Don't forget, please do come.

कियत् कालं तिष्ठति ?   How long will you be here ?

एषा वार्ता मम कर्णमपि आगता ।
I have heard of this news.

सः स्तोकात् मुक्तः ।   He escaped narrowly.

भवन्तं द्रष्टुं सः पुनः आगच्छति किल ?
He is going to come back to see you, isn't he ?

अहं किमर्थं असत्यं वदामि ?   Why should I tell a lie ?

भवान् अपि एवं वदति वा ?
Of all the people are you going to say this ?

भवान् एवं कर्तुं अर्हति वा ?   Can you do this ?

भवान् गच्छतु, मम किञ्चित्कार्यं अस्ति ।
You proceed, I have some work.

वृथा भवान् चिन्तां करोति ।
You just worry unnecessarily.

दैवेच्छा तथा आसीत्, किं कुर्मः ?
It was God's will, what shall we do ?

अहं अन्यद् उक्तवान्, भवान् अन्यद् गृहीतवान् ।
I told you one thing, you understood it differently.

एतावद् अनृतं वदति इति न ज्ञातवान् ।
I never expected that he would tell a lie.

प्रमादतः संवृत्तम्, न तु बुद्ध्या।
I did not do it purposely, it was just accidental.

एषः एकः शनिः। This fellow is a bugbear.

भवदुक्तं सर्वं अपि अङ्गीकर्तुं न शक्यम्।
I cannot agree with all you say.

अहं गन्तुं न शक्नोमि। I cannot go.

विषयस्य वर्धनं मास्तु। Don't escalate the matter.

सर्वेऽपि पलायनशीलाः। All these fellows take to their heels in the face of danger.

असम्बद्धं मा प्रलपतु। Don't talk foolishly.

सर्वस्य अपि भवान् एव मूलम्।
You are the root cause of all these.

सुलभेन तस्य जाले पतितवान्। He fell into his trap easily.

अस्माकं मिलनानन्तरं बहु कालः अतीतः।
It is a long time since we met.

इदानीं आगन्तुं न शक्यते। I cannot come now.

भवान् अपि अङ्गीकरोति वा? Do you agree?

भवान् अपि विश्वासं कृतवान्? Did you believe that?

सः विश्वासयोग्यो वा? Is he trustworthy?

किञ्चित् साहाय्यं करोति वा?
Would you mind helping me a bit?

समयः कथं अतिशीघ्रं अतीतः!
How quickly the time passed!

युक्ते समये आगतवान्। You have come at the right time.

एक निमेषं विलम्बः चेत् अहं गच्छामि स्म ।
I would have left if you were late by a minute.

अहमपि भवता सह आगच्छामि वा ?
Shall I come with you ?

किञ्चित् कालं द्विचक्रिकां ददाति वा ? Would you mind lending me your bicycle for a few minutes ?

इदानीं मया अपि अन्यत्र गन्तव्यम् ।
I have to go somewhere now.

भवान् स्वकार्यं पश्यतु । You mind your business.

शीघ्रं प्रत्यागच्छामि । I'll be back in a short while.

आवश्यकं चेत् श्वः आनयामि ।
If you want it, I shall bring it tomorrow.

'मास्तु' इत्युक्तेऽपि सः न शृणोति ।
I said no, but he doesn't listen to me.

प्रयाणम् Journey

चीटिकां कुत्र क्रीणामि ? Where shall I buy a ticket ?

शीघ्रं आगच्छतु, यानं गच्छति ।
Come quickly, the bus is about to start.

इदानीं एव एकं यानं गतम् ।
A bus left just a few minutes ago.

अहं भवतः पार्श्वे उपविशामि । I'll sit beside you.

किञ्चित् समञ्जनं कुर्मः । Let us adjust a bit.

महान् जनसम्मर्दः । Terrible rush.

परिवर्तं ददातु । Give me the change.

अग्रे गच्छतु । Go forward.

कदा वा निर्गच्छति ? What time does it start ?

शीघ्रं अवतरतु । Get off quickly.

अग्रिमं निस्थानं अस्माकं वा ? Is the next station ours ?

मल्लेश्वरयानस्य का संख्या ?
Which bus (route number) goes to Malleswaram ?

किंसंख्याकं यानं जयनगरं गच्छति ?
Which bus goes to Jayanagar ?

फलकमपि नास्ति, किमपि नास्ति। No sign board, nothing.

अये, पादपथे आगच्छतु । Hey, walk on the foot path.

मल्लेश्वरं गन्तुं कः मार्गः ?
Which is the way to Malleswaram ?

बहुदूरे अस्ति वा ? Is it very far ?

एषः सङ्केतः कुत्र इति जानाति वा ? Could you possibly tell me where this address/place is ?

इतः केवलं दशनिमेषाणां गमनम् ।
It is just ten minutes walk from here.

यानं न लब्धम् । Missed the bus.

यानस्य निर्गमनाय इतोऽपि अर्धघण्टा अस्ति ।
It is still half an hour before the bus starts.

यानं दशवादने आगच्छति । The bus arrives at 10.

पञ्चवादने एकं यानं अस्ति । There is a bus at 5.

*

यानं तदानीम् एव आगत्य स्थितम् ।

Bus has already arrived at the platform.

आरक्षणं नास्ति । No reservation please.

एवमेव अग्रे गच्छन्तु । Go just along this road.

अत्रैव कुत्रचित् स्यात्, अन्वेषणं कुर्मः ।

It will be somewhere here. Let us search for it.

तत्रैव अस्ति/तत्रैव स्यात् । It is there/It might be there.

अहं न जानामि, अन्यं पृच्छतु ।

I don't know, ask some one else please.

भवान् शीघ्रं न गच्छति चेत् यानं न मिलति ।

If you do not walk faster, you will miss the bus.

एषः मार्गः कुत्र गच्छति ? Where does this path lead to ?

भवान् आरक्षणं कृतवान् वा ? Have reserved your seat ?

सर्वं स्वीकृतवान् किल ?

You have taken everything, haven't you ?

कृपया सर्वबन्धकं स्वीकरोतु । Please take your hold-all.

स्यूतम् the bag	एतद् this	चीटिकाम् the ticket
यानस्यूतम् the air bag	यानपेटिकाम् the suitcase	
वनितास्यूतम् the vanity bag		

धनविषये जागरूको भवतु । Be careful with your money.

ततः आगन्तुं एतावान् विलम्बः वा ?

Such a long time to come here from there ?

एकं अपि यानं न आगतम् । Not a single bus has come.

षष्टिसंख्याकं यानं गतं वा ? Has route 60 gone ?
अहं इदानीं एव आगतवान् । I have just arrived.
कीदृशः मार्गः अयम् ! What a road !

प्रवासतः प्रतिनिवर्तनम् On arrival

कदा आगतवान् ? When did you come ?
अद्य प्रातः आगतवान् वा ? Did you come this morning ?
कथम् आसीत् प्रवासः ? How was the journey ?
प्रवासे व्यवस्था समीचीना आसीत् वा ?
How were all the arrangements during the tour ?
कति दिनानां.... ? How many days........ ?
एकाकी गतवान् वा ? Did you go alone ?
एकाकी किमर्थम् ? परिवारसमेतः गतवान् ।
Why alone ? I went with my family.
दिनत्रयं तत्र स्थितवान् । I stayed there for three days.
मार्गमध्ये अपघातः अभवत् ।
There was an accident on the road.
विशेषतया कोऽपि न व्रणितः ।
No one was seriously injured.
वस्तूनि तावन्ति एव वा ? Only so much luggage ?
बहुधा श्रान्तः अस्मि भोः । Very tired, you know.
त्रिचक्रिका किमर्थम् ? Why rickshaw ?
लोकयानेन गच्छामः । Let's go by bus.

लोकयानेन	By bus	त्रिचक्रिकायां	In a rickshaw
सुखयानेन	By luxury bus	पादाभ्याम्	On foot
सामिसुखयानेन	by semi-luxury bus	संलपन्तः	talking

कः प्रतीक्षते भोः ? Who waits for ?

त्रिचक्रिकायां एव गच्छामः। Let's go by rickshaw only.

किमर्थं वृथा व्ययः इति ? Why waste money unnecessarily ?

बहुकालतः प्रतीक्षां करोमि। I have been waiting for long.

कदा प्रस्थितः ? When did you start ?

काशीं रामेश्वरं सर्वं दृष्टवान् वा ?
Have you visited Kashi and Rameswar ?

कियत् सुन्दरं अस्तीति जानाति वा ?
Do you know how nice it is ?

महद् अद्भुतम्। Fantastic.

छात्राः Students

अत्रैव कलाशालायां पठामि। Studying in a college here.

सिद्धता कथम् अस्ति ? How is your preparation ?

पाठ्यभागः एव न समाप्तः।
Portions have not been completed.

गणितश्रवणमात्रेण मम शिरोवेदना।
Mathematics is a head-ache to me.

गाढं अभ्यासः वा ? Studying very hard ?

अद्य किमपि न पठितवान् एव। Couldn't read much today.

मम अक्षराणि न सुन्दराणि । My handwriting is not good.

एतां कादम्बरीं पठितवान् वा ? Have you read this novel ?

बहु सम्यक् अस्ति । It is very interesting.

बहु पूर्वमेव पठितवान् । I read it long ago.

शीघ्रं पठित्वा ददामि भोः ।
I'll return it early after reading.

अद्य उत्थाने विलम्बः सञ्जातः । Got up a bit late today.

अहं गृहे एव त्यक्त्वा आगतवान् । I have left it at home.

अद्य तु विरामः । Today is a holiday, any way.

भवतः वर्गशिक्षकः कः ? Who is your class teacher ?

अद्य समवस्त्रेण गन्तव्यं वा ?
Do we have to go in our uniforms today ?

यावत् शालां गतवान् तावत् घंटा ताडिता ।
The bell went by the time we reached school.

श्रीमन्, अन्तः आगच्छामि वा ? May I come in, sir ?

श्रीमन् विशेषकक्ष्यां स्वीकरोति वा ?
Are you going to take a special class, sir ?

लेखनीं एकवारं ददाति वा ? May I borrow your pen ?

टिप्पणीं किञ्चित् ददाति वा ?
Would you kindly lend me your notes ?

ह्यः एव गिरीशः स्वीकृतवान् ।
Girish borrowed it yesterday.

अहं तद्दिने वर्गं न आगतवान् आसम् ।
I did not attend the class that day.

आगच्छतु भोः, क्रीडामः । Come on, let's play.

पठनीयं बहु अस्ति भोः । I have a lot to read you know.

किं मम पठनीयं नास्ति वा ?

Do you think I don't have anything to read ?

पदवी अशीतितमे वर्षे समापिता वा ?

Did you take your degree in 80 ?

सम्यक् न स्मरामि भोः । I do not remember exactly.

तिष्ठतु, अहं स्मरामि तत् । Wait, I know it.

श्वः आरभ्य सहाध्ययनं कुर्मः ।

Let us do combined study from tomorrow.

परीक्षा Examination

परीक्षारम्भः कदा इति ज्ञातः वा ? Do you know when is the examination going to begin ?

प्रवेशपत्रं स्वीकृतं वा ?

Have you taken the admission ticket ?

परीक्षा अग्रे गता । The examination is postponed.

वेलापत्रिका आगता वा ?

Has the examination time table come ?

परीक्षा कथम् आसीत् ? How was the examination ?

प्रश्नपत्रिका किञ्चित् क्लिष्टा आसीत् ।

The question paper was a bit tough.

अतीव सुलभा आसीत् । It was very easy.

अहं प्रथमश्रेण्यां उत्तीर्णः । I have passed in I class.

ह्यः फलितांशः प्रकटितः ।
The result was announced yesterday.

अङ्कद्वयेन प्रथमश्रेणी न लब्धा ।
I missed I class by two marks.

प्रश्नेषु विकल्पः एव नासीत् । There was no choice at all.

फलितांशः श्वः ज्ञातः भविष्यति ।
The result will be announced tomorrow.

रमेशः उत्तीर्णः वा ? Has Ramesh passed ?

एकं पत्रं अवशिष्टं इति उक्तवान् । He has told me
that he has to complete one paper yet.

पठितं किमपि न स्मरामि भोः ।
Don't remember what I have read, you know.

दशवारं पठितवान्, तथापि न स्मरामि ।
I read it ten times, even then I do not remember.

प्रायशः द्वितीयश्रेणी लभ्येत ।
Most probably, I will pass in II class.

अस्माकं गणे सर्वेऽपि उत्तीर्णाः ।
Every one passed in our batch.

प्रतिशतं कति अङ्काः प्राप्ताः ? What is the percentage ?

चलनचित्रम् Film

मासे कति चित्राणि पश्यति ?
How often do you go to films in a month ?

द्विवारं त्रिवारं वा । Twice or three times.

चित्रमन्दिरं पूर्णं आसीत्। It was houseful.

महान् सम्मर्दः आसीत्। There was a lot of rush.

चीटिका न लब्धा वा? Couldn't you get a ticket?

चित्रं कथं आसीत्? How was the film?

करमुक्तं इति दृष्टवान्। I just saw that it is tax free.

कः निर्देशकः? Who is the Director?

तर्हि समीचीनं एव स्यात्। In that case it should be good.

संवादः/कथा समीचीना अस्ति। The dialogue/story is good.

एतद् द्वितीयवारं पश्यन् अस्मि।
I am seeing it for the second time.

एकमपि चित्रं सम्यक् नास्ति। Not a single film is good.

परह्यः एव दृष्टवान् अहम्।
I saw it the day before yesterday.

केवलं निस्सारं, जामिता भवति।
Just bogus, terribly boring.

तर्हि किमर्थं द्रष्टव्यम्? Why should you see it then?

मयापि एकवारं द्रष्टव्यम्। I must see it once myself.

सर्वे मिलित्वा गतवन्तः वा? Did you all go together?

केवलं धनं व्यर्थम्। Just waste of money.

शिक्षकः Teacher

भवतः वेतनश्रेणी का? What is your scale of pay?

इदानीं सर्वत्र समाना किल?
Now it is uniform everywhere, isn't it?

प्राचार्यस्य आदेशं दृष्टवान् वा ?
Have you seen the Principal's memo ?

अहो ! तत्तु सामान्यम् । Oh ! leave it. It is common.

अधिवेतनं लब्धं वा ? Got your increment ?

लिपिकं दृष्टवान् वा ? Have you seen the clerk ?

एवं चेत् कथं जीवामः ? How to live in that case ?

महान् कोलाहलः इति श्रुतवान् ।
I heard, there was a lot of noise.

पत्रिका पठिता वा ? वेतनं वर्धितम् ।
Read the newspaper. A raise in pay is announced.

कदा आरभ्य अन्वयः ? When does it come into effect ?

इदानीं कक्ष्या अस्ति वा ? Do you have classes now ?

अद्य कक्ष्यां न स्वीकरोमि इति सूचयतु ।
Tell them, I am not going to take classes today.

प्राचार्यः आगतः वा ? Has the Principal come ?

अस्मिन् मासे कति विरामाः ?
How many holidays (are there) this month ?

परश्वः विरामः अस्ति वा ?
Is there a holiday, the day after ?

प्रश्नपत्रिका सज्जीकृता वा ? Is the question paper ready ?

अस्मिन् वर्षे फलितांशः कथम् ?
How is the result this year ?

एतावन्तः अङ्काः कथं लब्धाः इति ?
How did he manage to get such high marks ?

परीक्षकाणां औदार्यम्। Examiners' large heartedness.

परीक्षा अन्या, योग्यता अन्या।
Examination is one thing, ability is another.

मौल्यमापनार्थं गच्छति वा? Are you going for valuation?

मौल्यमापनं कुत्र? Where is valuation going to be?

अस्वस्थः अपि आगतवान्। I am here inspite of being ill.

इदानींतन बालास्तु! The students of the present day!

अये अत्र आगच्छतु। Hey, come here.

गणितस्य अध्यापकः अस्ति वा पश्यतु।
See, if the Mathematics teacher is there.

ते तु बालाः किल! After all they are students!

किं भोः, सम्यक् पठति किल?
You are studying well, aren't you?

संशयः अस्ति चेत् पृच्छन्तु। Ask if you have any doubts.

ज्ञातं किल?
Understand?

पुनः एकवारं वदतु।
Beg your pardon. (This means please repeat).

एकम् अपि गणितं न कृतवान् वा?
Haven't you worked out a single sum?

एवं चेत् परीक्षायां किं करोति? At this rate how are you going to face the examination?

सेवकं किञ्चित् आह्वयतु। Please call the peon.

घण्टा नादिता वा? Has the bell gone?

टिप्पणीं लिखन्तु। Please take the notes.

एकोऽपि न जानाति वा ?

Doesn't even one know the answer ?

भवान् ज्ञातवान् वा ? वदतु किञ्चित् ।

Have you understood ? come on. Repeat.

अद्य एतावदेव पर्याप्तम् । Enough for today.

अस्य अनुच्छेदस्य अन्ते समापयामः ।

Let us stop at the end of this paragraph.

श्वः एतद् सम्यक् पठित्वा आगन्तव्यम् ।

Read this well when you come tomorrow.

गृहे किमपि पठन्ति वा ? Do you read anything at home ?

किं भोः कोलाहलः ! What is the noise there about ?

ह्यः कियत् पर्यन्तं पाठितवान् ?

Where did we stop yesterday ?

स्त्रियः Women

गृहकार्यं सर्वं समाप्तं वा ? Finished your household work ?

समाप्तप्रायम् । Yes, finished for all practical purposes.

किं द्वित्राणि दिनानि न दृष्टा !

Not seen for two or three days ?

अहं मातृगृहं गतवती । I had been to my mother's house.

एषु दिनेषु विमला मिलितवती वा ?

Have you met Vimala recently ?

कार्यालयतः तस्य आगमन समयः एषः ।

It is time he comes from the office.

ममापि बहु कार्यम् अस्ति ।
I have a lot of work to do myself.

अतिथयः आगताः सन्ति । Guests have come.

किञ्चित् 'शर्करां' ददाति वा ?
Would you kindly lend me some sugar ?

शर्करां sugar	सुपिष्टं wheat flour
क्षीरं milk	पृथुकं beaten rice
काफीचूर्णं coffee powder	चालनीम् sieve

भवतः माता किं करोति स्म ?
What was your mother doing ?

अद्य प्रातः आरभ्य बहु कार्याणि ।
I've had a lot of work since morning.

तेषां पुत्र्याः विवाहः निश्चितः इति श्रुतवती ।
Their daughter's marriage is fixed, I heard.

वरः विदेशे अस्ति ।
The bridegroom is in a foreign country.

कन्यायाः कृते किं किं आभरणं दास्यन्ति ?
What jewellery are they going to give the bride ?

मृत्तैलं लब्धं वा ? Got kerosene ?

मृत्तैलं विक्रीयते इति श्रुतवती ।
I heard, they are selling kerosene.

पाकः Cooking

पाकः समाप्तः वा ? Finished cooking ?

अद्य कः पाकः ? What cooked today ?

भोजनं अभवत् वा ? Have you had lunch ?

भवत्याः गृहं कश्चिद् आगत इव ।
It seems someone has come to your house.

अन्यत् किमपि नास्ति, केवलं सारः । Nothing except soup.

अस्मद् गृहे एकैकस्य एकैका रुचिः ।
In our house every one has his/her different tastes.

वेषभूषणानि Dress, Jewellers

भवत्याः शाटिका नूतना वा ? Is your saree new ?

नैव, गतवर्षे एव क्रीतवती । No, it was bought last year.

तथापि नूतनम् इव प्रतिभाति । Still it appears new.

एतादृशी शाटिका मम समीपे अपि अस्ति ।
I have one saree like this.

अहं नूतनशाटिकां क्रीतवती । I have bought a new saree.

अञ्चलः बहु सम्यक् अस्ति । The border is very beautiful

इमां कुत्र क्रीतवती ? Where did you buy this ?

अस्याः शाटिकायाः अनुरूपः चोलः न लब्धः ।
I could not get a matching blouse for this saree.

वलयस्य विन्यासः आकर्षकः अस्ति ।
The style of these bangles is really attractive.

शाटिकया सा प्रौढा इव दृश्यते ।
This saree makes her look taller.

परिणाहः बहु न्यूनः । Width is less.

अहं अपि एकां क्रेतुं इच्छामि । I would like to buy one.

बहु सुन्दरं अस्ति किल एतद् ? It is very good, isn't it ?

भवत्याः एतद् युज्यते । This suits you well.

कियद् दत्तवती ? How much did you pay ?

मुम्बईतः मम अग्रजः आनीतवान् ।
Brother brought it from Bombay.

कार्यालयः Office

भवान् कति दिनानि विरामं स्वीकरोति ?
How many days of leave are you taking ?

एषु दिनेषु महान् कार्यभारः ।
Of late the weight of work is unbearable.

इमां सूचनाफलके स्थापयतु ।
Put this up on the notice board.

अत्र हस्तांकनं करोतु । Sign here please.

सः विरामं स्वीकृतवान् । He is on leave.

अस्मिन् विषये पुनः अपि चिन्तयामि ।
I will think about this again.

आगामि सप्ताहे मां पश्यतु । See me next week.

अस्मिन् विषये अनन्तरं वदामि । I'll tell you about it later.

एतत् अहं अवश्यं स्मरामि । I'll certainly remember this.

भवदुक्तं सर्वं ज्ञातवान् भोः ।
I have understood what you said.

अत्र तस्य एव सर्वाधिकारः। He is all in all here.

मम कृते काऽपि दूरवाणी आगता वा ?
Any phone calls for me ?

भवतः कृते दूरवाणी आगता आसीत् ।
There was a phone call for you.

भवान् कस्मिन् स्थाने नियुक्तः अस्ति ?
Which post do you occupy in the office ?

एषः सर्वदा आगत्य पीडयति। He troubles me always.

इदानीं समयः अतीतः। It is getting late.

कृपया श्वः आगच्छतु । Come tomorrow please.

सः आगतवान् इति स्मरामि । I remember, he came here.

पञ्चवादनपर्यन्तं अत्रैव आसीत् । He was here till 5.00.

मां आहूतवान् वा ? Did you call me ?

तद् व्यवस्थां अहं करोमि। I will see to that arrangement.

कार्यालयस्य समाप्तिः कदा ? When does your office close ?

एतद्विषये श्वः पुनरपि स्मारयतु ।
Remind me about this tomorrow.

तम् अत्र आगन्तुं सूचयतु । Ask him to come here.

किमर्थं इदानीं अपि कार्यं न आरब्धम् ?
Why hasn't the work begun ?

अन्येषां उपहासेनैव कालं यापयति।
He spends time criticizing others

मया किं करणीयं, वदतु। Tell me what I should do

अहं किं करोमि भोः ? What shall I do ?

अस्तु, परिशीलयामः। Be it so, let us see.

आगच्छतु, किञ्चित् काफीं पिबामः।
Come, let us have a cup of coffee.

भवान् शीघ्रं प्रत्यागच्छति वा ?
Are you going to be back soon ?

कृपया उपविशतु। Please sit down.

पञ्चनिमेशेषु एतद् कृत्वा ददामि।
I'll get it done in five minutes.

अद्य सः अत्र नास्ति किल।
As you know, he is not here today.

सः एकसप्ताहाभ्यन्तरे आगच्छेत्।
He may be back in a week's time.

आरोग्यम् Health

मम आरोग्यं समीचीनं नास्ति। I am not well.

महती पादवेदना। Terrible leg pain.

सामान्यतः शिरोवेदना तदा तदा आगच्छति।
Generally I get headache now and then.

किञ्चित् ज्वरः इव .... Feel a little feverish ....

वैद्यं पश्यतु। Consult a doctor.

मम वमनशङ्का। I feel like vomitting.

वैद्यस्य निर्देशनं स्वीकरोतु। Get a doctor's advice.

किमर्थं कण्ठः अवरुद्धः?
Why is there the blocking of the throat?

अहं अतीव श्रान्तः। I am very tired.

तस्य आरोग्यं कथं अस्ति? How is his health?

अद्य किञ्चित् उत्तमा (देहस्थितिः)। A bit better today.

प्रातः आरभ्य लघु शिरोवेदना।
Slight head-ache since morning.

आरोग्यं तावत् सम्यक् नास्ति।
Somehow, my health is not good.

वैद्यं कदा दृष्टवान्? When did you see the doctor last?

उत्साहः एव नास्ति भोः। Don't feel active, you know.

ह्यः तु स्वस्थः आसीत्। He was alright yesterday.

किं अद्य अहं भोजनं करोमि वा?
Shall I have my meals today?

अद्य ज्वरः कथं अस्ति? How is the fever today?

यथावत्। As usual.

तदा तदा उदरवेदना पीडयति किल?
You get stomach ache now and then, don't you.

ज्वरपीडितः वा? कदा आरभ्य? Fever? Since when?

अय्यो! रक्तं स्रवति! Oh! Blood is coming out.

अपघाते सः जीवितः इत्येव विशेषः।
It is a miracle, he survived the accident.

*

सः चिकित्सालये प्रवेशितः ।

He is admitted to the hospital.

मम शिरः भ्रमति इव । I feel giddy.

समयः Time

कः समयः ? What is the time ?

सपादचतुर्वादनम् । A quarter past four.

द्विवादने अवश्यं गन्तव्यं अस्ति । I must leave at 2.

त्रिवादने एकं यानं अस्ति । There is a bus at three.

पादोन षड्वादने भवान् मिलति वा ?

Will you meet me at a quarter to six ?

सार्धपञ्चवादने अहं गृहे तिष्ठामि ।

I will be at home at half past five.

पञ्च-ऊन दशवादने मम घटी स्थगिता ।

My watch stopped at 5 minutes to 10 o' clock.

संस्कृतवार्ताप्रसारः सायं दशाधिक षड्वादने ।

The Samskrit news bulletin is at 6-10 p.m.

सार्धं द्विघण्टात्मकः कार्यक्रमः ।

It is a programme for 2½ hours.

षड्वादनपर्यन्तं तत्र किं करोति ?

What are you going to do there till 6 o' clock ?

शाला दशवादनतः किल ?

The school is from 10 o' clock isn't it ?

इतोऽपि यथेष्टं समयः अस्ति । Still there is a lot of time.

त्रिवादनम्

पञ्चाधिकत्रिवादनम्

सपादचतुर्वादनम्

दशाधिकत्रिवादनम्

सार्धचतुर्वादनम्

पञ्चऊनत्रिवादनम्

पादोनपञ्चवादनम्

चत्वारिंशद् अधिकत्रिवादनम्

सः षड्वादनतः सप्तवादनपर्यन्तं योगासनं करोति।
He does Yogasanas from 6 A.M. to 7 A.M.

मम घटी निमेशद्वयं अग्रे सरति।
My watch goes two minutes fast every day.

समये आगच्छतु। Come in time.

अरे! दशवादनम्? Oh! It is 10 o' clock?

भवतः आकाशवाणी समयः वा? Is yours the radio time?

इदानीं यथार्थः समयः कः? What is the exact time now?

किमर्थं एतावान् विलम्बः? Why (are you) so late?

इदानीं भवतः समयावकाशः अस्ति वा? Are you free now?
(Can you spare a few minutes for me?)

रविवासरे कः दिनाङ्कः? What date is Sunday?

रविवासरे चतुर्विंशतितमदिनाङ्कः? Sunday is 24th?

पञ्चदशदिनाङ्के कः वासरः? Which / What } day is 15th?

भवतः शाला कदा आरब्धा? When did your school begin?

जून प्रथम दिनाङ्के। On 1st June.

भवतः जन्मदिनाङ्कः कः? Which / What } is your date of birth?

अष्टादश-दश-षडशीतिः। 18-10-63.

दूरवाणी Telephone

हरिः ओम्। Hullo!

प्रतिष्ठानस्य कार्यालयः वा? Is it the Pratishthana office?

राजुमहोदयस्य गृहं वा? Is it Mr. Raju's house?

एषा षट्-शून्य-शून्य-शून्य चत्वारि वा ? Is it 60004 ?

कः तत्र:/कः सम्भाषणं करोति ? Who is speaking please ?

अहं कृष्णः। It is Krishna speaking.

कः अपेक्षितः ? Whom do you want to speak to ?

कृष्णः गृहे अस्ति वा ? Is Mr. Krishna at home ?

क्षम्यताम्, सः गृहे नास्ति। Sorry, he is not at home.

कृपया एतद् कृष्णं सूचयतु।
Would you kindly pass this on to Mr. Krishna ?

कृपया तं आह्वयति वा ? Would you please call him ?

अस्तु, एकक्षणं तिष्ठतु। Yes, wait a minute please.

कः दूरवाणीं कृतवान् इति वदामि ?
Who shall I say phoned him up ?

सः श्वः आगच्छेत्। He may be back tomorrow.

अस्तु, श्वः पुनः दूरवाणीं करोमि।
O.K. I will ring him up again tomorrow.

किं, इदानीमपि न आगतवान् वा ?
What ! Hasn't he come yet ?

तस्य दूरवाणी सङ्ख्या का ? What is his phone number ?

गृहे मिलेत् वा ? Will he be available at home ?

मद्रासतः इदानीमपि न आगतवान्।
Not yet returned from Madras.

अवश्यं सूचयामि। Certainly I will inform him.

स्थापयामि वा ?
Shall I put down the phone ? (Shall I hang up ?)

किञ्चित् उच्चैः वदतु। Speak louder please.

वाणिज्यम् Commerce

रूप्यकस्य कति फलानि ? — How many a rupee ?

एकैकस्य पञ्चविंशतिपैसाः ? — 25 paise each please.

रूप्यकस्य पञ्च। — Five per rupee.

शुद्धं नवनीतं ददातु। — Give me good butter please.

पुस्तकानि समाप्तानि। — The book is out of stock.

एतद् पुस्तकं नास्ति वा ? — Don't you have this book ?

तण्डुलः सम्यक् नास्ति। — The rice is not good.

दशपैसाः न्यूनाः सन्ति। — The amount is short by 10 paise.

मम व्यवहारं समापयतु। — Please settle my account.

भवतः परीवृत्तिः कथमस्ति ? — How is the business ?

तत्र गमनं मास्तु भोः, सः बहुमूल्यं वदति।
He is very expensive, let us not go to him.

कृपया देयकं/प्राप्तिपत्रं ददातु।
Give me the bill/receipt please.

विंशतिरूप्यकाणि वा? तर्हि मास्तु।
Is it Rs. 20 ? Then I don't want it.

आवश्यकं आसीत्, परन्तु भवान् मूल्यं अधिकं वदति।
I wanted it, but you quote a very high price.

भवतः कृते इति न्यूनमूल्येन ददामि।
I am selling it at a lower price to you.

पार्श्वापणे पृच्छतु। — Please enquire at the next shop.

एतावत् न्यूनमूल्येन अन्यत्र कुत्रापि न मिलति।
You can't get it cheaper anywhere else.

एकपञ्चाशत् रू. स्वीकुर्वन्तु । Please take Rs. 51.

नैव, तत्र विवादः एव नास्ति । No, no haggling please.

एतद् वस्त्रं कुत्र क्रीतवन्तः ? Where did you buy this cloth ?

भवान् अधिकं (मूल्यं) दत्तवान् । You paid more.

'किलो' कृते कति ? How much is this per kilo ?

फेनकस्य मूल्यं कियत् ? How much does this soap cost ?

'किलो' दालस्य कृते कति रूप्यकाणि ?
How much is dal per kilo ?

दन्तफेनः अस्ति वा ? Have got tooth paste ?

तिष्ठतु, ददामि । Please wait, I'll give you.

कति/कियत् ददामि । How much shall I give you ?

इदानीं मास्तु, अनन्तरं आगच्छामि ।
Not now, I will come later.

एतद् समीचीनं अस्ति वा ? Is it good ?

वातावरणम् Weather

वायुः एव न वाति । The wind is still.

आरात्रि वृष्टिः आसीत् । It rained for the whole night.

घर्मो घर्मः । Very hot indeed.

किं भोः ! क्लिन्नः अस्ति ! You have perspired all over.

प्रातः आरभ्य एवमेव वृष्टिः ।
It has been raining like this since morning.

अद्य वृष्टिः भवति वा ? Is it going to rain today ?

किं एषा उष्णता भोः ! What sultry weather, you know.

शैत्यम् अहो शैत्यम् ! It is very cold indeed.

महती वृष्टिः । Heavy rain.

वृष्टितः एव भयम् । I am frightened only of the rain.

दिने दिने शीतं अधिकं भवति । The cold is increasing day by day.

यद्वा तद्वा वृष्टिः । Too much rain/It's raining cats and dogs.

वायुरहो वायुः । Too much of wind/Too windy.

अत्र वायुः सुष्ठु वाति । Nice breeze here.

बहु औष्ण्यं किल ? It is very hot, isn't it ?

अद्य किञ्चित् शैत्यं अधिकम् । It is a bit colder today.

भवतः प्रदेशे वृष्टिः कथम् ? Have you had rains in your place ?

कुत्रापि वृष्टिः नास्ति । No sign of rain anywhere.

गृहसम्भाषणम् Domestic

अद्य प्रातराशः कः ? What have you cooked for breakfast ?

अद्य पाको नाम पाकः/अद्यतन पाकः बहु सम्यक् अस्ति । Today's cooking is really grand.

किमर्थं अद्य रुचिरेव नास्ति ? Why, dishes are not tasty today ?

रुचिकरं नास्ति वा ? Aren't they tasty, really ?

लवणं एव नास्ति । No salt at all.

व्यञ्जने लवणं न्यूनम् । This curry has no salt at all.

अन्नं बहु उष्णम् । The rice is very hot.

तद् पुनः किञ्चित् परिवेषयतु ।
Serve me the other dish a bit more.

जलं पूरयतु । Get me some water please.

एकचषकं जलं आनयतु । Get me a glass of water please.

किञ्चित् व्यञ्जनं परिवेषयतु । Get me some dry curry.

अन्नम् rice	सारः soup	लवणम् salt
कथितम् sambar	उपदंशम् pickle	घृतम् ghee
तक्रम् butter milk	तैलम् oil	पर्पटम् pappadam
व्यञ्जनम् dry curry	उपसेचनम् chatney	

किं, न रोचते वा ?
Aren't they tasty ? Don't you like them ?

लवणं किञ्चित् अधिकम् । A bit too much of salt in it.

किं अम्ब, प्रतिदिनं सारः एव ?
Dear, why, only soup/rasam every day ?

अद्य अपि सारः एव ? Just soup today also ?

किं अम्ब ! कियत् परिवेषितवती ?
Dear, you have served a bit too much.

कियद् अस्ति तत् ? Oh ! That isn't much.

अम्ब ! किञ्चित् उपदंशं परिवेषयतु ।
Mummy, get me some pickles please.

अम्ब, अद्य कदा वा भोजनम् ? Mummy, what time are you going to serve lunch/dinner today ?

सावधानं परिवेषयतु। Serve slowly please.

अद्य भूरि भोजनम्। Today we have a grand meal.

अधिकं जलं मा पिबतु, शीतं भवति। Dont drink too much water, You will catch a cold.

अनेन व्यञ्जनं करणीयं आसीत्। You should have cooked dry curry from this vegetable.

तेमनं न परिवेषितवती एव।
You haven't served curd sambar at all.

पुनः एकवारं पायसं परिवेषयतु।
May I have a second helping with paayasam ?

उत्तिष्ठतु, भोजनं कुर्मः।
Get ready please, let us have meals.

इदमिदानीं भोजनं समाप्तम्।
I have just had meals, thank you.

अहं रोटिकां न खादामि। I do not eat chapathis.

रोटिका अस्ति चेत् समीचीनं (अभविष्यत्)। It would have been wonderful had there been chapathis.

किं भोः, भोजनमेव न करोति?
Why dear, you do not eat anything?

अन्ने केवलं पाषाणाः। A lot of stones in the rice.

दध्यन्नं परिवेषयामि वा? Shall I serve curd-rice ?

तक्रं न इच्छति वा? Don't you want butter milk ?

भोजनं सम्यक् करोति चेत् क्रीडनकं ददामि।
Eat well, please. I will give a doll.

तेषां गृहे किं खादितवान्?

What did you eat in their house?

शीघ्रं भोजनं करोतु, विलम्बः अभवत्।

It is getting late, eat quickly.

इदानीं मास्तु, अनन्तरं ददामि।

Not now, I will give it to you later.

किञ्चित् वा दध्यन्नस्य भोजनं करोतु।

Eat at least a little curd-rice.

अद्य मधुरभक्ष्यं किम्?

What sweets have you prepared today?

बहु मधुरम्। It is too sweet.

अम्ब, बुभुक्षा भवति। Mummy, I am hungry.

मम तु इदानीं अतीव बुभुक्षा। I am very hungry.

भोजनं सिद्धं वा? शालायाः विलम्बः भवति।

Have you finished eating?
It is getting late for school.

भोजनं कृत्वा निद्रां करोतु। Have a nap after meals.

अस्तु, परिवेषणं करोमि।

Yes, I am going to serve in a minute.

किञ्चित् स्वीकरोतु। Take a little.

मास्तु, अधिकं भवति।

No, thank you. It is too much for me.

परिवेषाणार्थं कियान् विलम्बः?

Dear, how long do you take to serve?

यावद् रोचते तावदेव स्वीकरोतु। Eat only what you can.

सर्वे मिलित्वा भोजनं कुर्मः । Let us eat together.

अय्यो, घृतं एव न परिवेषितवती अहं ।
My Goodness ! I haven't served ghee at all.

भवता वक्तव्यं आसीत् किल ?
Shouldn't you have told me that ?

कियान् विलम्बः भोः, शीघ्रं आगच्छतु ?
How long do you take, come quickly.

सः इदानीं अपि न आगतवान् वा ? Hasn't he come, yet ?

स्थालिका स्थापिता वा ? Have you laid the table ?
(Have yet set the plates for meals ?)

स्थालिका एव न स्थापिता !
You haven't laid the table yet !

लवणं किञ्चित् योजयतु, सम्यक् भवति ।
Add some salt, it will be O.K.

हस्तं प्रक्षाल्य उपविशतु ।
Wash before you come for meals.

मास्तु, यथेष्टं अभवत् । No thank you, I've had enough.

सङ्कोचः मास्तु, आवश्यकं चेत् पृच्छतु ।
Please feel at home. Ask for anything you want.

न, मम सङ्कोचः एव नास्ति ।
No, I do not have any reservations.

किञ्चित् । Please, a little more.

अम्ब, अत्र किञ्चित् परिवेषयतु ।
Mummy, get me some more.

कः लवणं आवश्यकं इति उक्तवान् ? Who has asked for salt ?

क्वथितापेक्षया सारः एव रुचिकरः। The soup is tastier than the sambar.

एकैकशः वदतु नाम। Speak one at a time please.

विना शब्दं भोजनं कुर्वन्तु नाम। Eat without making too much noise.

प्रथमः कः ? सः वा भवान् वा ? Who is first, he or you ?

पाकः शीतलं भवति। Dishes are getting colder.

पाकः तदानीं एव सिद्धः। Lunch/Dinner is ready.

व्याघरणं कृतं चेत् पाकः सिद्धः। Everything is ready. I have to season the curry, that's all.

शाकः नास्ति, अहं किं करोमि ? No vegetables, what can I do ?

भवती पक्तुं एव न जानाति अम्ब। Mummy, you do not know how to cook.

ह्यस्तनं व्यञ्जनं कियत् रुचिकरं आसीत् ! How tasty was yesterday's dry curry !

कतिवारं उक्तवान् एतद् मह्यं न रोचते इति ? How many times did I tell you that I don't like it ?

तथा चेत् श्वः भवान् एव पाकं करोतु। In that case you cook the food yourself tomorrow.

अस्य रुचिं पश्यतु। Taste this please.

क्षीरं दूषितम्। Milk has become sour.

तूष्णीं भोजनं करोति वा ? Will you eat without comments ?

पुनः पुनः चर्वणं कृत्वा खादतु ।

Chew the food well before you swallow it.

परिवेषणं कृतं, शीघ्रं आगच्छतु ।

Food is already served. Come quickly.

भवान् किमपि न खादितवान् ।

You haven't eaten anything.

पुनः परिवेषयतु । Serve again.

पितरः पुत्राः च Fathers/sons/mothers

एतावत्पर्यन्तं कुत्र गतवान् ? Where had been so long ?

कुत्रापि न, अत्रैव आसम् । I was just here.

पठनं किमपि नास्ति वा ? Nothing to read ?

(Don't you have anything to read ?)

वक्त प्रष्टा कोऽपि नास्ति वा ?

Is there no one to keep you under check.

सहस्रवारं उक्तं, श्रुतवान् वा ?

I told you a thousand times. Did you listen to me ?

मम गृहपाठः बहु अस्ति । I have a lot of homework to do.

अद्य एव शुल्कं दातव्यं अस्ति ।

I have to pay the fees right today.

अन्तिमदिनाङ्कः कदा ?

Which is the last date for payment of fees ?

अद्य एव दातव्यं वा ? Have to pay it right today ?

किं, अद्य दातव्यं वा ? What, do we have to pay it today ?

अम्ब, एकं नवीनं युतकं आवश्यकम् ।
Mummy, I would like to have a new shirt.

गोविन्द, आपणं गत्वा आगच्छति वा ?
Govind, will you go to the shop to get something ?

अम्ब, वेणीबन्धं करोतु, शालायाः विलम्बः भवति । Mummy, twine my plait, it is getting late for school.

कः समयः इति जानाति वा ?
Do you know what time it is, now ?

किमर्थं विलम्बः ? Why are you late ?

पितरं एकवारं आह्वयतु । Please ask daddy to come here.

भवतः कृते कथनापेक्षया स्वयं करणं वरम् । Better do the work myself rather than asking you to do it.

भवती अनन्तरं उपविशतु । You sit down a little later.

तस्य कृते चत्वारि दत्तवती, मम कृते तु त्रीणि एव !
You gave him four, only three to me.

सर्वं भवान् एव खादितवान् वा ?
Have you eaten everything yourself ?

एकं कार्यं कतिवारं वक्तव्यम् ?
How often should I tell you about that ?

कुत्रापि स्थापयति, अनन्तरं मां पृच्छति ।
You misplace it somewhere and come and ask me !

भोजनसमये आह्वयामि, गच्छतु इदानीम् ।
I will call you during meal time, off you go now.

'तेन सह न गच्छतु' इति दशवारं उक्तवती । I have asked you ten times not to go in his company.

पार्श्वगृहं गत्वा पत्रिकां आनयतु ।
Get me the newspaper from our neighbour.

अहं सर्वं व्यवस्थितं स्थापयितुं, सः व्यस्तं कर्तुम् ! I keep things in order and he throws everything away.

अम्ब, किञ्चित् सीवनं करोतु ।
Mummy, stitch this up please.

कृपया एतद् बहिः क्षिपतु । Please throw this away.

शाकं किञ्चित् कर्तयित्वा ददातु । Cut the vegetables please.

एकवारं एव सर्वं वदतु भवती ।
Tell me everything at one go.

भवान् धीमान् / कुशलः बालः । You are a good boy.

अम्ब, अत्र किञ्चित् वेदना अस्ति । Mummy, it pains me here.

निद्रां करोतु, सम्यक् भविष्यति ।
Sleep well, you will be all right.

रात्रौ कषायं करोमि । I'll make some medicine at night.

पीत्वा शयनं करोतु । You may drink it and then sleep.

इदानीं गत्वा किञ्चित् पठतु । Go and read now.

किं, इदानीं एव निद्रा वा ? What ! feeling sleepy so early ?

'गणिते दश अंकाः एव' इति स्मरति वा ? Do you remember, you have scored only 10 in mathematics ?

अम्ब, तान् अन्यत्र पठितुं वदतु ।
Mummy, ask them to read in separate rooms.

एतावत् धनं न पर्याप्तम् ।
This much (money) is not enough.

शिरसि तैलसमुक्षणं करोतु। Please apply oil to my head.

निद्रया आन्दोलनं करोति, पश्यतु। See, he is dozing.

शिशुः रोदिति। The child is crying.

संमार्जनं कृतवती वा ? Have you swept the floor ?

इदानीं अपि रङ्गवल्लीं न लिखितवती वा ? Haven't you yet drawn designs in front of the house ?

कतिवारं वक्तव्यम् ? How often should I tell you ?

कुत्र गतवान् ? गृहे नास्ति वा ?
Where has he gone ? Isn't he at home ?

प्रत्युत्तरं न वदतु। Don't answer back.

उक्तं न श्रुतवान् वा ?
Haven't you listened to what I told you ?

अद्यतन पत्रिकां ददातु। Give me today's newspaper.

सः आगतवान्, एषः प्रस्थितवान्।
He came in, and this fellow has started.

कटं प्रसारयतु। Spread the mat please.

रजकः वस्त्रं नीतवान् वा ?
Has the washerman taken the clothes ?

वस्त्राणि शुष्कयितुं प्रसारयतु।
Spread the clothes for drying.

गत्वा शयनं करोतु। Go to bed and sleep.

एकं आसन्दं आनयतु। Bring me a chair.

इदानीं अपि निद्रा न आगता वा ? Haven't you slept yet ?

पश्यतु, कः शब्दं करोति ? See, who is making that noise ?

किमिदं, सर्वत्र अवकरः ?
What is this ? It is dirty everywhere.

द्वारं पिदधातु। (द्वारपिधानं करोतु) Close the door please.

एतद् किञ्चित्कालं गृह्णातु। Hold it for some time.

मध्ये सम्भाषणं न करोतु। Don't butt in while I speak.

कोलाहलं मा करोतु। Don't make noise, be quiet.

दीपान् ज्वालयतु। Put on the lights, please.

दीपान् निर्वापयतु। Put off the lights, please.

व्यजनं चालयतु। Put on the fan, please.

बहिः अन्धकारः, करदीपं गृहीत्वा गच्छतु।
It is dark outside, take the torch with you.

अवहितमनसा करणीयम्। Do it with some interest, please.

श्रद्धया करणीयम्। Do it with your heart in it please.

तं यानं आरोप्य आगच्छतु। Please see him on to the bus.

पाणिपादं प्रक्षालयतु। Have a wash please.

कुड्मान् योजयतु। Button your shirt please.

आरोग्यं निर्लक्ष्य मा पठतु।
Don't read too much and spoil your health.

इतःपरं एवं न कर्तव्यम्। Don't do this again.

द्राविडप्राणायामेन न वदतु, साक्षात् वदतु।
Don't go on beating about the bush. Speak plainly.

सम्यक् दन्तधावनं करोतु। Brush your teeth well.

विना कारणं कुप्यति।
You get angry and shout unnecessarily.

वृथा कालहरणं करोति । You are wasting time.

मां न कोपयतु । Don't enrage me!

हठं मा करोतु । Don't be arrogant.

किमर्थं भवान् क्षुभ्यति ? Why are you shouting ?

प्रथमं शिरोमार्जनं करोतु । Dry your hair first.

आर्द्रवस्त्रं न धारयतु । Don't put on wet clothes.

शीघ्रं स्नानं कृत्वा आगच्छतु । Have your bath quickly.

भाण्डे जलं अस्ति वा ? Is there water in the barrel ?

आकाशवाणीं चालयतु । Put on the radio please.

विविधभारतीं योजयतु ।
Switch on to Vividhabharathi please.

वार्ता समाप्ता वा ? Is the news over ?

मातापितरः Parents

अद्य किञ्चित् पूर्वं आगच्छन्ति वा ?
Will you come back home a bit early today dear ?

किमर्थं ? कः विशेषः ? Why ? anything special ?

सायं आगमनसमये शाकं आनयन्ति वा ?
Bring some leafy vegetable, will you ?

रविवासरे तान् आह्वयामः वा ?
Shall we invite them on Sunday ?

बालिका किमपि आवश्यकं इति वदति स्म ।
The girl was asking for something.

अवश्यं स्मृत्वा आनयन्तु । Please bring it without fail.

किमर्थं प्रतिदिनं विलम्बेन आगच्छन्ति ?

Why do you come late everyday ?

कस्मिन् समये आगच्छन्ति अद्य ?

What time will you be back today ?

कुञ्चिकां पार्श्वगृहे दत्वा गच्छामि।

I will leave the key with our neighbours.

किमिति पदे पदे आह्वयन्ति ?

Why are you calling me again and again ?

सर्वं तत्रैव अस्ति, किञ्चित् पश्यन्तु। Everything is there.

Look for them a bit more carefully, please.

भोजनार्थं कोऽपि विशेषः . . . . ?

Any special arrangement for meals ?

अद्य अस्माकं कृते काफी अस्ति वा ?

Is there going to be some coffee for us ?

इदानीम् अपि स्नानं न कृतम् ? No bath yet ?

भवन्तः किल-मास्तु इति उक्तवन्तः !

It is you who said you did not want it.

समये एकमपि/किमपि न मिलति।

You didn't get anything when you need it badly.

वेतनं लब्धं वा ? Got your salary ?

क्षीरार्थं अद्य एव दातव्यं अस्ति।

We have to pay the milk-man today.

ते सर्वदा कलहं कुर्वन्ति। They always quarrel.

तथा किमर्थं वदति ? Why do you say so ?

तत्र अस्ति वा नास्ति वा इति प्रथमं एव द्रष्टव्यम्।
You have to see first if it is there or not.

अहं कार्यालयं गच्छामि। I am going to my office.

अस्य जतुलेपं कारयन्तु। Get this vessel gilted.

मार्गे सौचिकं विचार्य गच्छन्तु।
Look up the tailor on your way.

सुताः Children

मम लेखनीं स्वीकृतवान् वा ? Have taken my pen ?

पिता अस्ति, तूष्णीं उपविशतु। Daddy is in, be quiet.

कृपया मनसि पठतु। Read silently please.

भगिनि, मम कृते गणितं पाठयति वा ?
Sister dear, will you teach me mathematics ?

मम शिक्षकः एवं एव पाठितवान्।
My teacher has taught one just this way.

भवतः लेखनी कुत्र ? Where is your pen ?

मम छत्रं भवान् किमर्थं स्वीकृतवान् ?
Why did you take my umbrella ?

तस्य कृते किमर्थं दत्तवान् ? Why did you give it to him ?

तत्कारणतः इदानीं अनुभवतु।
Now you suffer on account of that.

न, अहं पितरं सूचयामि। No, I am going to tell daddy.

पठनं नास्ति, किमपि नास्ति, केवलं अटति।
Doesn't read at all, just roams about.

भवतः सर्वं अहं जानामि। I know all your secrets.

भवती बहु पठति, जानामि। You read a lot, I know.

अद्य भवतः मित्रं मार्गे मिलितः।
I met your friend on the way.

भवतः मित्रं अहं मिलितवान्। I met your friend.

सः किमपि उक्तवान् वा? Did he say anything?

परीक्षा कदा इति स्मरति किल? You remember when your examination commences, don't you?

रमेशः भवन्तं आह्वयति। Ramesh is calling you.

पश्यतु, नासिका स्रवति। Look, you have a running nose.

नासिकां स्वच्छं कृत्वा आगच्छतु।
Clean your nose, will you?

वक्तव्यं आसीत्, करोमि स्म। You should have told me, I would have done it.

अङ्कन्या मास्तु, लेखन्या लिखतु।
Write with your pen, not with a pencil.

तिष्ठतु, युतकं परिवर्त्य आगच्छामि।
Wait, I will just change the shirt.

एतद् युतकं बहु सम्पृक्तम्। This shirt is a bit too small.

अपरं युतकं एवं नास्ति। The other shirt is not so.

सङ्कीर्ण वाक्यानि Miscellaneous Sentences

उन्नत्या उभावपि समानौ। Both are of the same height.

अस्माकं गृहे सर्वे अस्वस्थाः। Every one is ill in my house.

मशको मशकः ! Too many mosquitoes !

मत्कुणो मत्कुणः ! Too many bugs !

मशकजालः कुत्र ? Where is the mosquito net ?

अन्तः कोऽपि नास्ति वा ? Isn't there any one at home ?

दूषितः कालः । Times have changed for the worse !

कर्मकराः एव दुर्लभाः । You don't get labourers at all.

महती घोरिका भोः महाशयस्य ।
This big fellow snores loudly !

अतिथिः Guests

पानीयं किं ददामि ?
What would you like to have for a drink ?

तर्हि पानकं आनयामि । O.K. I will bring juice.

भवान् काफीं पिबति उत चायम् ?
Do you prefer coffee or tea ?

किञ्चित् विश्रान्तिं अनुभवतु । Have some rest please.

अद्यैव गन्तव्यं वा ? Do you have to leave right now ?

भोजनान्तरं गच्छतु । Go after lunch.

दिनद्वयं तिष्ठतु भोः । Stay for two days.

रात्रौ निद्रा सम्यक् आसीत् । I had sound sleep last night.

रात्रौ निद्रा एव नास्ति भोः ।
I had not even a wink of sleep last night.

बहिः गतवान्, इदानीं आगच्छति ।
He has gone out, will be back in a few minutes.

शुभाशयाः Greetings

दीपावली शुभाशयाः । Wish you a happy Deepavali.

युगादि शुभाशयाः । Wish you a happy New Year

मकरसङ्क्रमणस्य/पोङ्गल् शुभाशया ।
Wish you a happy Sankranthi/Pongal.

नववर्षस्य शुभाशयाः ।
Hearty greetings for a happy new year.

नववर्षं नवचैतन्यं ददातु ।
Let the new year bring a new life.

भवतः वैवाहिकजीवनं शुभमयं भवतु ।
Wish you a very happy married life.

नवदम्पत्योः वैवाहिकजीवनं सुमधुरं भूयात् ।
Wish the couple a very happy married life.

सफलतायै अभिनन्दनम् ।
Hearty congratulations on your success.

भवदीयः समारम्भः यशस्वी भवतु ।
Wish the function a grand success.

शतं जीव शरदो वर्धमानः ।
May you live for one hundred years.

शुभाः ते पन्थानः । Wish you a pleasant journey.
Good bye (God be with you).

प्राप्तिस्थानम्

हिन्दु सेवा प्रतिष्ठानम्

संस्कृत विभागः

७३/२, 'अक्षरम्', रङ्गराव्मार्गः, शङ्करपुरम्, बेङ्गलूरु-५६० ००४